| CSM – 44/20 |
|---|
| Indian Language & Literature in Sanskrit |
| Paper – I |

*Time : 3 hours*

*Full Marks : 300*

*The figures in the right-hand margin indicate marks.*

*Candidates should attempt Q. No. 1 from Section – A and Q. No. 5 from Section – B which are compulsory and any* ***three*** *of the remaining questions, selecting at least* ***one*** *from each Section.*

## SECTION – A

1. केषाञ्चित् त्रयाणां विभागानामुत्तरं कार्यम् : 20×3 = 60

(क) अधोलिखितेषु शब्दानां यथोचितं सन्धिं विसन्धिं वा कुरुत :

(i) माता + दाव + इति

(ii) नस्स्थितिः

(iii) मृत्यः + रतम्

(iv) रामश्चिनोति

(v) कुर्वन्नेवेह

(vi) पण्डा + इतच्

(vii) संस्कर्ता

(viii) पुरः + करोति

(ix) सः + उमेशः

(x) यथैवहि

(ख) अधोनिर्दिष्टानां सूत्राणामर्थो सोदाहरणं स्पष्टीक्रियताम् :

(i) कर्तुरीप्सिततमं कर्म

(ii) अपवर्गे तृतीया

(iii) स्पृहेरीप्सितः

(iv) भीत्रार्थानां भयहेतुः

(v) यतश्च निर्धारणम्

(ग) अधोलिखितेषु समस्तपदानां समासनामानि सविग्रहवाक्यं लिख्यन्ताम् :

(i) नीलाम्बरम्

(ii) पीताम्बरः

(iii) सभार्यः

(iv) पितरौ

(v) गंगायमुने

(घ) वाच्यपरिवर्तनं कुरूत :

(i) सः व्याकरणमधीते ।

(ii) दरिद्राय धनं देहि ।

(iii) रामेण बाणेन हतो वालिः ।

(iv) हरिः सेव्यते भक्तेन ।

(v) उदाहरणं प्रदर्श्यताम् ।

2. वैदिकध्रुपदीसंस्कृतयोः पार्थक्यं सविस्तरं प्रतिपाद्यताम् । 60

3. वेदस्य षडङ्गानि सविशदं समुपवर्णयत । 60

4. "उपमा कालिदासस्य" उक्तिरियं सोदाहरणं सम्यक् आलोच्यताम् । 60

## SECTION – B

5. यथेच्छं त्रयः प्रश्नाः समाधेयम् : 20×3 = 60

(क) पुरुषार्थचतुष्टयं समाश्रित्य कश्चन निबन्धः प्रस्तूयताम् ।

(ख) वर्णाश्रमव्यवस्थामवलम्ब्य प्रबन्धमेकं विरचयत ।

(ग) अर्थशास्त्रानुसारं त्रयीस्थापना निरूपणीया ।

(घ) अर्थशास्त्रमाधारीकृत्य एको निबन्धः प्रस्तूयताम् ।

6. सांख्यदर्शनप्रतिपादितानां विषयवस्तूनां सम्यक् परिचयो देयः । 60

7. भारतीयदर्शनमथवा भारतीयसंस्कृतिमवलम्ब्य कश्चन निबन्धः प्रस्तूयताम् । 60

8. अधस्तनं गद्यांशमाश्रित्य अधोलिखिता सर्वे प्रश्नाः समाधेयाः : 10×6 = 60

तत्र वैयाकरणस्तावद् "विधिनिमन्त्रणाधीष्टसंप्रश्न-प्रार्थनेषु लिङ्" इति पाणिनिसूत्राद् विध्यादिषु षट्सु अर्थेषु लिङ् प्रवर्तते । तत्र विधिरात्मनो निष्कृष्टस्य भृत्यादेः क्वचित् कार्यविशेषे प्रवर्तनमाज्ञापरपर्यायम् । निमन्त्रणमकरणे प्रत्यवायबोधकप्रवर्तकेच्छा भोजनादौ । आमन्त्रणं कामचाराभ्यनुक्षा यथेष्टं प्रवर्ततामित्यादिका । अधीष्टः पूजादिसत्-कारपूर्वको व्यापारः अभ्यर्थनाख्यः उत्तमं प्रति प्रेरणारूपः । आशीः फलादिप्रार्थनम् । तत्र विद्‌यादीनां षण्णां पृथगुपादानेऽपि आद्येषु चतुर्षु अर्थेषु अन्यदीयप्रवृत्तिजननाकुलव्यापाररूपत्वस्य प्रवर्तनात्वस्य सत्त्वात् तेषां प्रवर्तनात्वेन रूपेण लिङा अभिधानात् तेषु अनुगतरूपेण एकैव शक्तिः ।

स च प्रवर्तनारूपो व्यापारः इष्टसाधनत्वरूप एव । इष्टसाधनत्वमेव प्रवर्तनात्वेन रूपेण लिङर्थः । इदमेव च विधितत्त्वं मण्डनमिश्रेनापि स्वीकृतम् । तथाहि तदीये **विधिविवेकग्रन्थे** —

"पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यप्रवर्तकः ।
प्रवृत्तिहेतुं धर्मश्च प्रवदन्ति प्रवर्तनाम् —॥" इति ।

प्रश्ना :

(क) पाणिनिमतानुसारं विधिः केषु अर्थेषु प्रवर्तते ? विधेर्लक्षणं किम् ?

(ख) किं नाम निमन्त्रणम् ? आमन्त्रणं वा किमस्ति ?

(ग) प्रेरणारूपः कः ? विशदीकुरुत ।

(घ) आद्येषु चतुर्षु अर्थेषु कथम् एका एव शक्तिः ? विवृणुत ।

(ङ) किं नाम इष्टसाधनत्वम् ? लिङर्थः कः ?

(च) मण्डनमिश्रेन विधितत्त्वविषये विधिविवेके किमुक्तम् ?